# ॥ ગકારાદિ શ્રીગણપતિસહસ્રનામસ્તોત્રમ્ ॥

.. Gakaradi Shri Ganapati Sahasranama Stotram ..

sanskritdocuments.org

August 20, 2017

# .. Gakaradi Shri Ganapati Sahasranama Stotram ..

## ॥ ગકારાદિ શ્રીગણપતિસહસ્રનામસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : gakArAdigaNapatisahasranAmastotram

File name : gakArAdigaNpatisahasranAmastotram.itx

Category : sahasranAma, ganesha

Location : doc_ganesha

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Karthik Raman karthik.raman at gmail.com

Proofread by : Karthik Raman karthik.raman at gmail.com

Latest update : January 10, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ ગકારાદિ શ્રીગણપતિસહસ્રનામસ્તોત્રમ્ ॥

અસ્ય શ્રીગણપતિગકારાદિસહસ્રનામમાલામન્ત્રસ્ય ।
દુર્વાસા ઋષિઃ । અનુષ્ટુપ્ છન્દઃ । શ્રીગણપતિર્દેવતા ।
ગં બીજમ્ । સ્વાહા શક્તિઃ । ગ્લૌં કીલકમ્ ।
મમ સકલાભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

॥ કરન્યાસઃ ॥

ૐ અઙ્ગુષ્ઠાભ્યાં નમઃ । શ્રીં તર્જનીભ્યાં નમઃ ।
હ્રીં મધ્યમાભ્યાં નમઃ । ક્રીં અનામિકાભ્યાં નમઃ ।
ગ્લૌં કનિષ્ઠિકાભ્યાં નમઃ । ગં કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
એવં હૃદયાદિન્યાસઃ ।
અથવા ષડ્દીર્ઙભાજાગમિતિબીજેન કરાઙ્ગન્યાસઃ ॥

॥ ધ્યાનમ્ ॥

ઓઙ્કાર સન્નિભમિભાનનમિન્દુભાલમ્ મુક્તાગ્રબિન્દુમમલદ્યુતિમેકદન્તમ્ ।
લમ્બોદરં કલચતુર્ભુજમાદિદેવં ધ્યાયેન્મહાગણપતિં મતિસિદ્ધિકાન્તમ્ ॥

॥ સ્તોત્રમ્ ॥

ૐ ગણેશ્વરો ગણાધ્યક્ષો ગણારાધ્યો ગણપ્રિયઃ ।
ગણનાથો ગણસ્વામી ગણેશો ગણનાયકઃ ॥ ૧॥

ગણમૂર્તિર્ગણપતિર્ગણત્રાતા ગણઞ્જયઃ ।
ગણપોઽથ ગણક્રીડો ગણદેવો ગણાધિપઃ ॥ ૨॥

ગણજ્યેષ્ઠો ગણશ્રેષ્ઠો ગણપ્રેષ્ઠો ગણાધિરાટ્ ।
ગણરાડ્ ગણગોપ્તાથ ગણાઙ્ગો ગણદૈવતમ્ ॥ ૩॥

ગણબન્ધુર્ગણસુહૃદ્ ગણાધીશો ગણપ્રથઃ ।
ગણપ્રિયસખઃ શશ્વદ્ ગણપ્રિયસુહૃત્ તથા ॥ ૪॥

ગણપ્રિયરતો નિત્યં ગણપ્રીતિવિવર્ધનઃ ।
ગણમણ્ડલમધ્યસ્થો ગણકેલિપરાયણઃ ॥ ૫॥

ગણાગ્રણીર્ગણેશાનો ગણગીતો ગણોચ્છ્રયઃ ।
ગણ્યો ગણહિતો ગર્જદ્ગણસેનો ગણોદ્ધતઃ ॥ ૬॥

ગણભીતિપ્રમથનો ગણભીત્યપહારકઃ ।
ગણનાર્હો ગણપ્રૌઢો ગણભર્તા ગણપ્રભુઃ ॥ ૭॥

ગણસેનો ગણચરો ગણપ્રજ્ઞો ગણૈકરાટ્ ।
ગણાગ્ર્યો ગણનામા ચ ગણપાલનતત્પરઃ ॥ ૮॥

ગણજિદ્ગણગર્ભસ્થો ગણપ્રવણમાનસઃ ।
ગણગર્વપરીહર્તા ગણો ગણનમસ્કૃતઃ ॥ ૯॥

ગણાર્ચિતાઙ્ઘ્રિયુગળો ગણરક્ષણકૃત્ સદા ।
ગણધ્યાતો ગણગુરુર્ગણપ્રણયતત્પરઃ ॥ ૧૦॥

ગણાગણપરિત્રાતા ગણાધિહરણોદ્ધુરઃ ।
ગણસેતુર્ગણનુતો ગણકેતુર્ગણાગ્રગઃ ॥ ૧૧॥

ગણહેતુર્ગણગ્રાહી ગણાનુગ્રહકારકઃ ।
ગણાગણાનુગ્રહભૂર્ગણાગણવરપ્રદઃ ॥ ૧૨॥

ગણસ્તુતો ગણપ્રાણો ગણસર્વસ્વદાયકઃ ।
ગણવલ્લભમૂર્તિશ્ચ ગણભૂતિર્ગણેષ્ટદઃ ॥ ૧૩॥

ગણસૌખ્યપ્રદાતા ચ ગણદુઃખપ્રણાશનઃ ।
ગણપ્રથિતનામા ચ ગણાભીષ્ટકરઃ સદા ॥ ૧૪॥

ગણમાન્યો ગણખ્યાતો ગણવીતો ગણોત્કટઃ ।
ગણપાલો ગણવરો ગણગૌરવદાયકઃ ॥ ૧૫॥

ગણગર્જિતસન્તુષ્ટો ગણસ્વચ્છન્દગઃ સદા ।
ગણરાજો ગણશ્રીદો ગણાભયકરઃ ક્ષણાત્ ॥ ૧૬॥

ગણમૂર્ધાભિષિક્તશ્ચ ગણસૈન્યપુરસ્સરઃ ।
ગુણાતીતો ગુણમયો ગુણત્રયવિભાગકૃત્ ॥ ૧૭॥

ગુણી ગુણાકૃતિધરો ગુણશાલી ગુણપ્રિયઃ ।
ગુણપૂર્ણો ગુણામ્ભોધિર્ગુણભાગ્ ગુણદૂરગઃ ॥ ૧૮॥

ગુણાગુણવપુર્ગૌણશરીરો ગુણમણ્ડિતઃ ।
ગુણસ્રષ્ટા ગુણેશાનો ગુણેશોઽથ ગુણેશ્વરઃ ॥ ૧૯॥

ગુણસૃષ્ટજગત્સઙ્ઘો ગુણસઙ્ઘો ગુણૈકરાટ્ ।
ગુણપ્રવૃષ્ટો ગુણભૂર્ગુણીકૃતચરાચરઃ ॥ ૨૦॥

ગુણપ્રવણસન્તુષ્ટો ગુણહીનપરાઙ્મુખઃ ।
ગુણૈકભૂર્ગુણશ્રેષ્ઠો ગુણજ્યેષ્ઠો ગુણપ્રભુઃ ॥ ૨૧॥

ગુણજ્ઞો ગુણસમ્પૂજ્યો ગુણૈકસદનં સદા ।
ગુણપ્રણયવાન્ ગૌણપ્રકૃતિર્ગુણભાજનમ્ ॥ ૨૨॥

ગુણિપ્રણતપાદાબ્જો ગુણિગીતો ગુણોજ્જ્વલઃ ।
ગુણવાન્ ગુણસમ્પન્નો ગુણાનન્દિતમાનસઃ ॥ ૨૩॥

ગુણસઞ્ચારચતુરો ગુણસઞ્ચયસુન્દરઃ ।
ગુણગૌરો ગુણાધારો ગુણસંવૃતચેતનઃ ॥ ૨૪॥

ગુણકૃદ્ગુણભૃન્નિત્યં ગુણાગ્ર્યો ગુણપારદૃક્ ।
ગુણપ્રચારી ગુણયુગ્ ગુણાગુણવિવેકકૃત્ ॥ ૨૫॥

ગુણાકરો ગુણકરો ગુણપ્રવણવર્ધનઃ ।
ગુણગૂઢચરો ગૌણસર્વસંસારચેષ્ટિતઃ ॥ ૨૬॥

ગુણદક્ષિણસૌહાર્દો ગુણલક્ષણતત્ત્વવિત્ ।
ગુણહારી ગુણકલો ગુણસઙ્ઘસખઃ સદા ॥ ૨૭॥

ગુણસંસ્કૃતસંસારો ગુણતત્ત્વવિવેચકઃ ।
ગુણગર્વધરો ગૌણસુખદુઃખોદયો ગુણઃ ॥ ૨૮॥

ગુણાધીશો ગુણલયો ગુણવીક્ષણલાલસઃ ।
ગુણગૌરવદાતા ચ ગુણદાતા ગુણપ્રદઃ ॥ ૨૯॥

ગુણકૃદ્ગુણસમ્બન્ધો ગુણભૃદ્ગુણબન્ધનઃ ।
ગુણહૃદ્યો ગુણસ્થાયી ગુણદાયી ગુણોત્કટઃ ॥ ૩૦॥

ગુણચક્રધરો ગૌણાવતારો ગુણબાન્ધવઃ ।
ગુણબન્ધુર્ગુણપ્રજ્ઞો ગુણપ્રાજ્ઞો ગુણાલયઃ ॥ ૩૧॥

ગુણધાતા ગુણપ્રાણો ગુણગોપો ગુણાશ્રયઃ ।
ગુણયાયી ગુણાધાયી ગુણપો ગુણપાલકઃ ॥ ૩૨॥

ગુણાહૃતતનુર્ગૌણો ગીર્વાણો ગુણગૌરવઃ ।

ગુણવત્પૂજિતપદો ગુણવત્પ્રીતિદાયકઃ ॥ ૩૩॥

ગુણવદ્ગીતકીર્તિષ્ચ ગુણવદ્બદ્ધસૌહૃદઃ ।
ગુણવદ્વરદો નિત્યં ગુણવત્પ્રતિપાલકઃ ॥ ૩૪॥

ગુણવદ્ગુણસન્તુષ્ટો ગુણવદ્રચિતસ્તવઃ ।
ગુણવદ્રક્ષણપરો ગુણવત્પ્રણયપ્રિયઃ ॥ ૩૫॥

ગુણવચ્ચક્રસઞ્ચારો ગુણવત્કીર્તિવર્ધનઃ ।
ગુણવદ્ગુણચિત્તસ્થો ગુણવદ્ગુણરક્ષકઃ ॥ ૩૬॥

ગુણવત્પોષણકરો ગુનવચ્છત્રુસૂદનઃ ।
ગુણવત્સિદ્ધિદાતા ચ ગુણવદ્ગૌરવપ્રદઃ ॥ ૩૭॥

ગુણવત્પ્રવણસ્વાન્તો ગુણવદ્ગુણભૂષણઃ ।
ગુણવત્કુલવિદ્વેષિવિનાષકરણક્ષમઃ ॥ ૩૮॥

ગુણિસ્તુતગુણો ગર્જપ્રલયામ્બુદનિઃસ્વનઃ ।
ગજો ગજપતિર્ગર્જદ્ગજયુદ્ધવિષારદઃ ॥ ૩૯॥

ગજાસ્યો ગજકર્ણોઽથ ગજરાજો ગજાનનઃ ।
ગજરૂપધરો ગર્જદ્ગજયૂથોદ્ધુરધ્વનિઃ ॥ ૪૦॥

ગજાધીષો ગજાધારો ગજાસુરજયોદ્ધુરઃ ।
ગજદન્તો ગજવરો ગજકુમ્ભો ગજધ્વનિઃ ॥ ૪૧॥

ગજમાયો ગજમયો ગજશ્રીર્ગજગર્જિતઃ ।
ગજામયહરો નિત્યં ગજપુષ્ટિપ્રદાયકઃ ॥ ૪૨॥

ગજોત્પત્તિર્ગજત્રાતા ગજહેતુર્ગજાધિપઃ ।
ગજમુખ્યો ગજકુલપ્રવરો ગજદૈત્યહા ॥ ૪૩॥

ગજકેતુર્ગજાધ્યક્ષો ગજસેતુર્ગજાકૃતિઃ ।
ગજવન્દ્યો ગજપ્રાણો ગજસેવ્યો ગજપ્રભુઃ ॥ ૪૪॥

ગજમત્તો ગજેશાનો ગજેશો ગજપુઙ્ગવઃ ।
ગજદન્તધરો ગુઞ્જન્મધુપો ગજવેષભૃત્ ॥ ૪૫॥

ગજચ્છન્નો ગજાગ્રસ્થો ગજયાયી ગજાજયઃ ।
ગજરાડ્ગજયૂથસ્થો ગજગઞ્જકભઞ્જકઃ ॥ ૪૬॥

ગર્જિતોજ્ઝિતદૈત્યાસુર્ગર્જિતત્રાતવિષ્ટપઃ ।
ગાનજ્ઞો ગાનકુશલો ગાનતત્ત્વવિવેચકઃ ॥ ૪૭॥

ગાનશ્લાઘી ગાનરસો ગાનજ્ઞાનપરાયણઃ ।
ગાનાગમજ્ઞો ગાનાઙ્ગો ગાનપ્રવણચેતનઃ ॥ ૪૮॥

ગાનકૃદ્ગાનચતુરો ગાનવિદ્યાવિશારદઃ ।
ગાનધ્યેયો ગાનગમ્યો ગાનધ્યાનપરાયણઃ ॥ ૪૯॥

ગાનભૂર્ગાનશીલશ્ચ ગાનશાલી ગતશ્રમઃ ।
ગાનવિજ્ઞાનસમ્પન્નો ગાનશ્રવણલાલસઃ ॥ ૫૦॥

ગાનયત્તો ગાનમયો ગાનપ્રણયવાન્ સદા ।
ગાનધ્યાતા ગાનબુદ્ધિર્ગાનોત્સુકમનાઃ પુનઃ ॥ ૫૧॥

ગાનોત્સુકો ગાનભૂમિર્ગાનસીમા ગુણોજ્જ્વલઃ ।
ગાનઙ્ગજ્ઞાનવાન્ ગાનમાનવાન્ ગાનપેશલઃ ॥ ૫૨॥

ગાનવત્પ્રણયો ગાનસમુદ્રો ગાનભૂષણઃ ।
ગાનસિન્ધુર્ગાનપરો ગાનપ્રાણો ગણાશ્રયઃ ॥ ૫૩॥

ગાનૈકભૂર્ગાનહૃષ્ટો ગાનચક્ષુર્ગાણૈકદૃક્ ।
ગાનમત્તો ગાનરુચિર્ગાનવિદ્ગાનવિત્પ્રિયઃ ॥ ૫૪॥

ગાનાન્તરાત્મા ગાનાઢ્યો ગાનભ્રાજત્સભઃ સદા ।
ગાનમયો ગાનધરો ગાનવિદ્યાવિશોધકઃ ॥ ૫૫॥

ગાનાહિતઘ્નો ગાનેન્દ્રો ગાનલીનો ગતિપ્રિયઃ ।
ગાનાધીશો ગાનલયો ગાનાધારો ગતીશ્વરઃ ॥ ૫૬॥

ગાનવન્માનદો ગાનભૂતિર્ગાનૈકભૂતિમાન્ ।
ગાનતાનતતો ગાનતાનદાનવિમોહિતઃ ॥ ૫૭॥

ગુરુર્ગુરુદરશ્રોણિર્ગુરુતત્ત્વાર્થદર્શનઃ ।
ગુરુસ્તુતો ગુરુગુણો ગુરુમાયો ગુરુપ્રિયઃ ॥ ૫૮॥

ગુરુકીર્તિર્ગુરુભુજો ગુરુવક્ષા ગુરુપ્રભઃ ।
ગુરુલક્ષણસમ્પન્નો ગુરુદ્રોહપરાઙ્મુખઃ ॥ ૫૯॥

ગુરુવિદ્યો ગુરુપ્રાણો ગુરુબાહુબલોચ્છ્રયઃ ।
ગુરુદૈત્યપ્રાણહરો ગુરુદૈત્યાપહારકઃ ॥ ૬૦॥

ગુરુગર્વહરો ગુહ્યપ્રવરો ગુરુદર્પહા ।
ગુરુગૌરવદાયી ચ ગુરુભીત્યપહારકઃ ॥ ૬૧॥

ગુરુશુણ્ડો ગુરુસ્કન્ધો ગુરુજઙ્ઘો ગુરુપ્રથઃ ।
ગુરુભાલો ગુરુગલો ગુરુશ્રીર્ગુરુગર્વનુત્ ॥ ૬૨॥

ગુરૂરુગુરુપીનાંસો ગુરુપ્રણયલાલસઃ ।
ગુરુમુખ્યો ગુરુકુલસ્થાયી ગુરુગુણઃ સદા ॥ ૬૩॥

ગુરુસંશયભેત્તા ચ ગુરુમાનપ્રદાયકઃ ।
ગુરુધર્મસદારાધ્યો ગુરુધર્મનિકેતનઃ ॥ ૬૪॥

ગુરુદૈત્યકુલચ્છેત્તા ગુરુસૈન્યો ગુરુદ્યુતિઃ ।
ગુરુધર્માગ્રગણ્યોઽથ ગુરુધર્મધુરન્ધરઃ ।
ગરિષ્ઠો ગુરુસન્તાપશમનો ગુરુપૂજિતઃ ॥ ૬૫॥

ગુરુધર્મધરો ગૌરધર્માધારો ગદાપહઃ ।
ગુરુશાસ્ત્રવિચારજ્ઞો ગુરુશાસ્ત્રકૃતોદ્યમઃ ॥ ૬૬॥

ગુરુશાસ્ત્રાર્થનિલયો ગુરુશાસ્ત્રાલયઃ સદા ।
ગુરુમન્ત્રો ગુરુશ્રેષ્ઠો ગુરુમન્ત્રફલપ્રદઃ ॥ ૬૭॥

ગુરુસ્ત્રીગમનોદ્દામપ્રાયશ્ચિત્તનિવારકઃ ।
ગુરુસંસારસુખદો ગુરુસંસારદુઃખભિત્ ॥ ૬૮॥

ગુરુશ્લાઘાપરો ગૌરભાનુખણ્ડાવતંસભૃત્ ।
ગુરુપ્રસન્નમૂર્તિશ્ચ ગુરુશાપવિમોચકઃ ॥ ૬૯॥

ગુરુકાન્તિર્ગુરુમયો ગુરુશાસનપાલકઃ ।
ગુરુતન્ત્રો ગુરુપ્રજ્ઞો ગુરુભો ગુરુદૈવતમ્ ॥ ૭૦॥

ગુરુવિક્રમસઞ્ચારો ગુરુદૃગ્ગુરુવિક્રમઃ ।
ગુરુક્રમો ગુરુપ્રેષ્ઠો ગુરુપાખણ્ડખણ્ડકઃ ॥ ૭૧॥

ગુરુગર્જિતસમ્પૂર્ણબ્રહ્માણ્ડો ગુરુગર્જિતઃ ।
ગુરુપુત્રપ્રિયસખો ગુરુપુત્રભયાપહઃ ॥ ૭૨॥

ગુરુપુત્રપરિત્રાતા ગુરુપુત્રવરપ્રદઃ ।
ગુરુપુત્રાર્તિશમનો ગુરુપુત્રાધિનાશનઃ ॥ ૭૩॥

ગુરુપુત્રપ્રાણદાતા ગુરુભક્તિપરાયણઃ ।
ગુરુવિજ્ઞાનવિભવો ગૌરભાનુવરપ્રદઃ ॥ ૭૪॥

ગૌરભાનુસ્તુતો ગૌરભાનુત્રાસાપહારકઃ ।
ગૌરભાનુપ્રિયો ગૌરભાનુર્ગૌરવવર્ધનઃ ॥ ૭૫॥

ગૌરભાનુપરિત્રાતા ગૌરભાનુસખઃ સદા ।
ગૌરભાનુર્પ્રભુર્ગૌરભાનુભીતિપ્રણશનઃ ॥ ૭૬॥

ગૌરીતેજઃસમુત્પન્નો ગૌરીહૃદયનન્દનઃ ।
ગૌરીસ્તનન્ધયો ગૌરીમનોવાઞ્છિતસિદ્ધિકૃત્ ॥ ૭૭॥

ગૌરો ગૌરગુણો ગૌરપ્રકાશો ગૌરભૈરવઃ ।
ગૌરીશનન્દનો ગૌરીપ્રિયપુત્રો ગદાધરઃ ॥ ૭૮॥

ગૌરીવરપ્રદો ગૌરીપ્રણયો ગૌરસચ્છવિઃ ।
ગૌરીગણેશ્વરો ગૌરીપ્રવણો ગૌરભાવનઃ ॥ ૭૯॥

ગૌરાત્મા ગૌરકીર્તિશ્ચ ગૌરભાવો ગરિષ્ઠદૃક્ ।
ગૌતમો ગૌતમીનાથો ગૌતમીપ્રાણવલ્લભઃ ॥ ૮૦॥

ગૌતમાભીષ્ટવરદો ગૌતમાભયદાયકઃ ।
ગૌતમપ્રણયપ્રહ્વો ગૌતમાશ્રમદુઃખહા ॥ ૮૧॥

ગૌતમીતીરસઞ્ચારી ગૌતમીતીર્થનાયકઃ ।
ગૌતમાપત્પરિહારો ગૌતમાધિવિનાશનઃ ॥ ૮૨॥

ગોપતિર્ગોધનો ગોપો ગોપાલપ્રિયદર્શનઃ ।
ગોપાલો ગોગણાધીશો ગોકશ્મલનિવર્તકઃ ॥ ૮૩॥

ગોસહસ્રો ગોપવરો ગોપગોપીસુખાવહઃ ।
ગોવર્ધનો ગોપગોપો ગોપો ગોકુલવર્ધનઃ ॥ ૮૪॥

ગોચરો ગોચરાધ્યક્ષો ગોચરપ્રીતિવૃદ્ધિકૃત્ ।
ગોમી ગોકષ્ટસન્ત્રાતા ગોસન્તાપનિવર્તકઃ ॥ ૮૫॥

ગોષ્ઠો ગોષ્ઠાશ્રયો ગોષ્ઠપતિર્ગોધનવર્ધનઃ ।

ગોષ્ઠપ્રિયો ગોષ્ઠમયો ગોષ્ઠામયનિવર્તકઃ ॥ ૮૬॥

ગોલોકો ગોલકો ગોભૃદ્ગોભર્તા ગોસુખાવહઃ ।
ગોધુગ્ગોધુગ્ગણપ્રેષ્ઠો ગોદોગ્ધા ગોમયપ્રિયઃ ॥ ૮૭॥

ગોત્રં ગોત્રપતિર્ગોત્રપ્રભુર્ગોત્રભયાપહઃ ।
ગોત્રવૃદ્ધિકરો ગોત્રપ્રિયો ગોત્રાર્તિનાશનઃ ॥ ૮૮॥

ગોત્રોદ્ધારપરો ગોત્રપ્રવરો ગોત્રદૈવતમ્ ।
ગોત્રવિખ્યાતનામા ચ ગોત્રી ગોત્રપ્રપાલકઃ ॥ ૮૯॥

ગોત્રસેતુર્ગોત્રકેતુર્ગોત્રહેતુર્ગતક્લમઃ ।
ગોત્રત્રાણકરો ગોત્રપતિર્ગોત્રેશપૂજિતઃ ॥ ૯૦॥

ગોત્રભિદ્ગોત્રભિત્ત્રાતા ગોત્રભિદ્વરદાયકઃ ।
ગોત્રભિત્પૂજિતપદો ગોત્રભિચ્છત્રુસૂદનઃ ॥ ૯૧॥

ગોત્રભિત્પ્રીતિદો નિત્યં ગોત્રભિદ્ગોત્રપાલકઃ ।
ગોત્રભિદ્ગીતચરિતો ગોત્રભિદ્રાજ્યરક્ષકઃ ॥ ૯૨॥

ગોત્રભિજ્જયદાયી ચ ગોત્રભિત્પ્રણયઃ સદા ।
ગોત્રભિદ્ભયસમ્ભેત્તા ગોત્રભિન્માનદાયકઃ ॥ ૯૩॥

ગોત્રભિદ્ગોપનપરો ગોત્રભિત્સૈન્યનાયકઃ ।
ગોત્રાધિપપ્રિયો ગોત્રપુત્રીપુત્રો ગિરિપ્રિયઃ ॥ ૯૪॥

ગ્રન્થજ્ઞો ગ્રન્થકૃદ્ગ્રન્થગ્રન્થિભિદ્ગ્રન્થવિઘ્નહા ।
ગ્રન્થાદિર્ગ્રન્થસઞ્ચારો ગ્રન્થશ્રવણલોલુપઃ ॥ ૯૫॥

ગ્રન્થાદીનક્રિયો ગ્રન્થપ્રિયો ગ્રન્થાર્થતત્ત્વવિત્ ।
ગ્રન્થસંશયસઞ્છેદી ગ્રન્થવક્તા ગ્રહાગ્રણીઃ ॥ ૯૬॥

ગ્રન્થગીતગુણો ગ્રન્થગીતો ગ્રન્થાદિપૂજિતઃ ।
ગ્રન્થારમ્ભસ્તુતો ગ્રન્થગ્રાહી ગ્રન્થાર્થપારદૃક્ ॥ ૯૭॥

ગ્રન્થદૃગ્ગ્રન્થવિજ્ઞાનો ગ્રન્થસન્દર્ભશોધકઃ ।
ગ્રન્થકૃત્પૂજિતો ગ્રન્થકરો ગ્રન્થપરાયણઃ ॥ ૯૮॥

ગ્રન્થપારાયણપરો ગ્રન્થસન્દેહભઞ્જકઃ ।
ગ્રન્થકૃદ્વરદાતા ચ ગ્રન્થકૃદ્વન્દિતઃ સદા ॥ ૯૯॥

ગ્રન્થાનુરક્તો ગ્રન્થજ્ઞો ગ્રન્થાનુગ્રહદાયકઃ ।
ગ્રન્થાન્તરાત્મા ગ્રન્થાર્થપણ્ડિતો ગ્રન્થસૌહૃદઃ ॥ ૧૦૦॥

ગ્રન્થપારઙ્ગમો ગ્રન્થગુણવિદ્ગ્રન્થવિગ્રહઃ ।
ગ્રન્થસેતુર્ગ્રન્થહેતુર્ગ્રન્થકેતુર્ગ્રહાગ્રગઃ ॥ ૧૦૧॥

ગ્રન્થપૂજ્યો ગ્રન્થગેયો ગ્રન્થગ્રથનલાલસઃ ।
ગ્રન્થભૂમિર્ગ્રહશ્રેષ્ઠો ગ્રહકેતુર્ગ્રહાશ્રયઃ ॥ ૧૦૨॥

ગ્રન્થકારો ગ્રન્થકારમાન્યો ગ્રન્થપ્રસારકઃ ।
ગ્રન્થશ્રમજ્ઞો ગ્રન્થાઙ્ગો ગ્રન્થભ્રમનિવારકઃ ॥ ૧૦૩॥

ગ્રન્થપ્રવણસર્વાઙ્ગો ગ્રન્થપ્રણયતત્પરઃ ।
ગીતં ગીતગુણો ગીતકીર્તિર્ગીતવિશારદઃ ॥ ૧૦૪॥

ગીતસ્ફીતયશા ગીતપ્રણયો ગીતચઞ્ચુરઃ ।
ગીતપ્રસન્નો ગીતાત્મા ગીતલોલો ગતસ્પૃહઃ ॥ ૧૦૫॥

ગીતાશ્રયો ગીતમયો ગીતતત્ત્વાર્થકોવિદઃ ।
ગીતસંશયસઞ્છેત્તા ગીતસઙ્ગીતશાશનઃ ॥ ૧૦૬॥

ગીતાર્થજ્ઞો ગીતતત્ત્વો ગીતાતત્ત્વં ગતાશ્રયઃ ।
ગીતાસારોઽથ ગીતાકૃદ્ગીતાકૃદ્વિઘ્નનાશનઃ ॥ ૧૦૭॥

ગીતાશક્તો ગીતલીનો ગીતાવિગતસઞ્જ્વરઃ ।
ગીતૈકદૃગ્ગીતભૂતિર્ગીતપ્રીતો ગતાલસઃ ॥ ૧૦૮॥

ગીતવાદ્યપટુર્ગીતપ્રભુર્ગીતાર્થતત્ત્વવિત્ ।
ગીતાગીતવિવેકજ્ઞો ગીતાપ્રવણચેતનઃ ॥ ૧૦૯॥

ગતભીર્ગતવિદ્વેષો ગતસંસારબન્ધનઃ ।
ગતમાયો ગતત્રાસો ગતદુઃખો ગતજ્વરઃ ॥ ૧૧૦॥

ગતાસુહૃદ્ગતજ્ઞાનો ગતદુષ્ટાશયો ગતઃ ।
ગતાર્તિર્ગતસઙ્કલ્પો ગતદુષ્ટવિચેષ્ટિતઃ ॥ ૧૧૧॥

ગતાહઙ્કારસઞ્ચારો ગતદર્પો ગતાહિતઃ ।
ગતવિઘ્નો ગતભયો ગતાગતનિવારકઃ ॥ ૧૧૨॥

ગતવ્યથો ગતાપાયો ગતદોષો ગતેઃ પરઃ ।
ગતસર્વવિકારોઽથ ગતગઞ્જિતકુઞ્જરઃ ॥ ૧૧૩॥

ગતકમ્પિતભૂપૃષ્ઠો ગતરુગ્ગતકલ્મષઃ ।
ગતદૈન્યો ગતસ્તૈન્યો ગતમાનો ગતશ્રમઃ ॥ ૧૧૪॥

ગતક્રોધો ગતગ્લાનિર્ગતમ્લાનો ગતભ્રમઃ ।
ગતાભાવો ગતભવો ગતતત્ત્વાર્થસંશયઃ ॥ ૧૧૫॥

ગયાસુરશિરશ્છેત્તા ગયાસુરવરપ્રદઃ ।
ગયાવાસો ગયાનાથો ગયાવાસિનમસ્કૃતઃ ॥ ૧૧૬॥

ગયાતીર્થફલાધ્યક્ષો ગયાયાત્રાફલપ્રદઃ ।
ગયામયો ગયાક્ષેત્રં ગયાક્ષેત્રનિવાસકૃત્ ॥ ૧૧૭॥

ગયાવાસિસ્તુતો ગયાન્મધુવ્રતલસત્કટઃ ।
ગાયકો ગાયકવરો ગાયકેષ્ટફલપ્રદઃ ॥ ૧૧૮॥

ગાયકપ્રણયી ગાતા ગાયકાભયદાયકઃ ।
ગાયકપ્રવણસ્વાન્તો ગાયકઃ પ્રથમઃ સદા ॥ ૧૧૯॥

ગાયકોદ્ગીતસમ્પ્રીતો ગાયકોત્કટવિઘ્નહા ।
ગાનગેયો ગાનકેશો ગાયકાન્તરસઞ્ચરઃ ॥ ૧૨૦॥

ગાયકપ્રિયદઃ શશ્વદ્ગાયકાધીનવિગ્રહઃ ।
ગેયો ગેયગુણો ગેયચરિતો ગેયતત્ત્વવિત્ ॥ ૧૨૧॥

ગાયકત્રાસહા ગ્રન્થો ગ્રન્થતત્ત્વવિવેચકઃ ।
ગાઢાનુરાગો ગાઢાઙ્ગો ગાઢાગઙ્ગાજલોઽન્વહમ્ ॥ ૧૨૨॥

ગાઢાવગાઢજલધિર્ગાઢપ્રજ્ઞો ગતામયઃ ।
ગાઢપ્રત્યર્થિસૈન્યોઽથ ગાઢાનુગ્રહતત્પરઃ ॥ ૧૨૩॥

ગાઢશ્લેષરસાભિજ્ઞો ગાઢનિર્વૃતિસાધકઃ ।
ગઙ્ગાધરેષ્ટવરદો ગઙ્ગાધરભયાપહઃ ॥ ૧૨૪॥

ગઙ્ગાધરગુરુર્ગઙ્ગાધરધ્યાતપદઃ સદા ।
ગઙ્ગાધરસ્તુતો ગઙ્ગાધરારાધ્યો ગતસ્મયઃ ॥ ૧૨૫॥

ગઙ્ગાધરપ્રિયો ગઙ્ગાધરો ગઙ્ગામ્બુસુન્દરઃ ।

ગઙ્ગાજલરસાસ્વાદચતુરો ગાઙ્ગતીરયઃ ॥ ૧૨૬॥

ગઙ્ગાજલપ્રણયવાન્ ગઙ્ગાતીરવિહારકૃત્ ।
ગઙ્ગાપ્રિયો ગઙ્ગાજલાવગાહનપરઃ સદા ॥ ૧૨૭॥

ગન્ધમાદનસંવાસો ગન્ધમાદનકેલિકૃત્ ।
ગન્ધાનુલિપ્તસર્વાઙ્ગો ગન્ધલુબ્ધમધુવ્રતઃ ॥ ૧૨૮॥

ગન્ધો ગન્ધર્વરાજોઽથ ગન્ધર્વપ્રિયકૃત્ સદા ।
ગન્ધર્વવિદ્યાતત્ત્વજ્ઞો ગન્ધર્વપ્રીતિવર્ધનઃ ॥ ૧૨૯॥

ગકારબીજનિલયો ગકારો ગર્વિગર્વનુત્ ।
ગન્ધર્વગણસંસેવ્યો ગન્ધર્વવરદાયકઃ ॥ ૧૩૦॥

ગન્ધર્વો ગન્ધમાતઙ્ગો ગન્ધર્વકુલદૈવતમ્ ।
ગન્ધર્વગર્વસઞ્છેત્તા ગન્ધર્વવરદર્પહા ॥ ૧૩૧॥

ગન્ધર્વપ્રવણસ્વાન્તો ગન્ધર્વગણસંસ્તુતઃ ।
ગન્ધર્વાર્ચિતપાદાબ્જો ગન્ધર્વભયહારકઃ ॥ ૧૩૨॥

ગન્ધર્વાભયદઃ શશ્વદ્ ગન્ધર્વપ્રતિપાલકઃ ।
ગન્ધર્વગીતચરિતો ગન્ધર્વપ્રણયોત્સુકઃ ॥ ૧૩૩॥

ગન્ધર્વગાનશ્રવણપ્રણયી ગર્વભઞ્જનઃ ।
ગન્ધર્વત્રાણસન્નદ્ધો ગન્ધર્વસમરક્ષમઃ ॥ ૧૩૪॥

ગન્ધર્વસ્ત્રીભિરારાધ્યો ગાનં ગાનપટુઃ સદા ।
ગચ્છો ગચ્છપતિર્ગચ્છનાયકો ગચ્છગર્વહા ॥ ૧૩૫॥

ગચ્છરાજોઽથ ગચ્છેશો ગચ્છરાજનમસ્કૃતઃ ।
ગચ્છપ્રિયો ગચ્છગુરુર્ગચ્છત્રાણકૃતોદ્યમઃ ॥ ૧૩૬॥

ગચ્છપ્રભુર્ગચ્છચરો ગચ્છપ્રિયકૃતોદ્યમઃ ।
ગચ્છગીતગુણો ગચ્છમર્યાદાપ્રતિપાલકઃ ॥ ૧૩૭॥

ગચ્છધાતા ગચ્છભર્તા ગચ્છવન્દ્યો ગુરોર્ગુરુઃ ।
ગૃત્સો ગૃત્સમદો ગૃત્સમદાભીષ્ટવરપ્રદઃ ॥ ૧૩૮॥

ગીર્વાણગીતચરિતો ગીર્વાણગણસેવિતઃ ।
ગીર્વાણવરદાતા ચ ગીર્વાણભયનાશકૃત્ ॥ ૧૩૯॥

ગીર્વાણગુણસંવીતો ગીર્વાણારાતિસૂદનઃ ।
ગીર્વાણધામ ગીર્વાણગોપ્તા ગીર્વાણગર્વહૃત્ ॥ ૧૪૦॥

ગીર્વાણાર્તિહરો નિત્યં ગીર્વાણવરદાયકઃ ।
ગીર્વાણશરણં ગીતનામા ગીર્વાણસુન્દરઃ ॥ ૧૪૧॥

ગીર્વાણપ્રાણદો ગન્તા ગીર્વાણાનીકરક્ષકઃ ।
ગુહેહાપૂરકો ગન્ધમત્તો ગીર્વાણપુષ્ટિદઃ ॥ ૧૪૨॥

ગીર્વાણપ્રયુતત્રાતા ગીતગોત્રો ગતાહિતઃ ।
ગીર્વાણસેવિતપદો ગીર્વાણપ્રથિતો ગલત્ ॥ ૧૪૩॥

ગીર્વાણગોત્રપ્રવરો ગીર્વાણફલદાયકઃ ।
ગીર્વાણપ્રિયકર્તા ચ ગીર્વાણાગમસારવિત્ ॥ ૧૪૪॥

ગીર્વાણાગમસમ્પત્તિર્ગીર્વાણવ્યસનાપહહ્ ।
ગીર્વાણપ્રણયો ગીતગ્રહણોત્સુકમાનસઃ ॥ ૧૪૫॥

ગીર્વાણભ્રમસમ્ભેત્તા ગીર્વાણગુરુપૂજિતઃ ।
ગ્રહો ગ્રહપતિર્ગ્રાહો ગ્રહપીડાપ્રણાશનઃ ॥ ૧૪૬॥

ગ્રહસ્તુતો ગ્રહાધ્યક્ષો ગ્રહેશો ગ્રહદૈવતમ્ ।
ગ્રહકૃદ્ગ્રહભર્તા ચ ગ્રહેશાનો ગ્રહેશ્વરઃ ॥ ૧૪૭॥

ગ્રહારાધ્યો ગ્રહત્રાતા ગ્રહગોપ્તા ગ્રહોત્કટઃ ।
ગ્રહગીતગુણો ગ્રન્થપ્રણેતા ગ્રહવન્દિતઃ ॥ ૧૪૮॥

ગવી ગવીશ્વરો ગર્વી ગર્વિષ્ઠો ગર્વિગર્વહા ।
ગવામ્પ્રિયો ગવાન્નાથો ગવીશાનો ગવામ્પતી ॥ ૧૪૯॥

ગવ્યપ્રિયો ગવાઙ્ગોપ્તા ગવિસમ્પત્તિસાધકઃ ।
ગવિરક્ષણસન્નદ્ધો ગવામ્ભયહરઃ ક્ષણાત્ ॥ ૧૫૦॥

ગવિગર્વહરો ગોદો ગોપ્રદો ગોજયપ્રદઃ ।
ગજાયુતબલો ગણ્ડગુઞ્જન્મત્તમધુવ્રતઃ ॥ ૧૫૧॥

ગણ્ડસ્થલલસદ્દાનમિળન્મત્તાળિમણ્ડિતઃ ।
ગુડો ગુડપ્રિયો ગુણ્ડગળદ્દાનો ગુડાશનઃ ॥ ૧૫૨॥

ગુડાકેશો ગુડાકેશસહાયો ગુડલડ્ડુભુક્ ।
ગુડભુગ્ગુડભુગ્ગણ્યો ગુડાકેશવરપ્રદઃ ॥ ૧૫૩॥

ગુડાકેશાર્ચિતપદો ગુડાકેશસખઃ સદા ।
ગદાધરાર્ચિતપદો ગદાધરવરપ્રદઃ ॥ ૧૫૪॥

ગદાયુધો ગદાપાણિર્ગદાયુદ્ધવિશારદઃ ।
ગદહા ગદદર્પઘ્નો ગદગર્વપ્રણાશનઃ ॥ ૧૫૫॥

ગદગ્રસ્તપરિત્રાતા ગદાડમ્બરખણ્ડકઃ ।
ગુહો ગુહાગ્રજો ગુપ્તો ગુહાશાયી ગુહાશયઃ ॥ ૧૫૬॥

ગુહપ્રીતિકરો ગૂઢો ગૂઢગુલ્ફો ગુણૈકદૃક્ ।
ગીર્ગીષ્પતિર્ગિરીશાનો ગીર્દેવીગીતસદ્ગુણઃ ॥ ૧૫૭॥

ગીર્દેવો ગીષ્પ્રિયો ગીર્ભૂર્ગીરાત્મા ગીષ્પ્રિયઙ્કરઃ ।
ગીર્ભૂમિર્ગીરસન્નોઽથ ગીઃપ્રસન્નો ગિરીશ્વરઃ ॥ ૧૫૮॥

ગિરીશજો ગિરૌશાયી ગિરિરાજસુખાવહઃ ।
ગિરિરાજાર્ચિતપદો ગિરિરાજનમસ્કૃતઃ ॥ ૧૫૯॥

ગિરિરાજગુહાવિષ્ટો ગિરિરાજાભયપ્રદઃ ।
ગિરિરાજેષ્ટવરદો ગિરિરાજપ્રપાલકઃ ॥ ૧૬૦॥

ગિરિરાજસુતાસૂનુર્ગિરિરાજજયપ્રદઃ ।
ગિરિવ્રજવનસ્થાયી ગિરિવ્રજચરઃ સદા ॥ ૧૬૧॥

ગર્ગો ગર્ગપ્રિયો ગર્ગદેહો ગર્ગનમસ્કૃતઃ ।
ગર્ગભીતિહરો ગર્ગવરદો ગર્ગસંસ્તુતઃ ॥ ૧૬૨॥

ગર્ગગીતપ્રસન્નાત્મા ગર્ગાનન્દકરઃ સદા ।
ગર્ગપ્રિયો ગર્ગમાનપ્રદો ગર્ગારિભઞ્જકઃ ॥ ૧૬૩॥

ગર્ગવર્ગપરિત્રાતા ગર્ગસિદ્ધિપ્રદાયકઃ ।
ગર્ગગ્લાનિહરો ગર્ગભ્રમહૃદ્ગર્ગસઙ્ગતઃ ॥ ૧૬૪॥

ગર્ગાચાર્યો ગર્ગમુનિર્ગર્ગસમ્માનભાજનઃ ।
ગમ્ભીરો ગણિતપ્રજ્ઞો ગણિતાગમસારવિત્ ॥ ૧૬૫॥

ગણકો ગણકશ્લાઘ્યો ગણકપ્રણયોત્સુકઃ ।

ગણકપ્રવણસ્વાન્તો ગણિતો ગણિતાગમઃ ॥ ૧૬૬॥

ગદ્યં ગદ્યમયો ગદ્યપદ્યવિદ્યાવિશારદઃ ।
ગલલગ્નમહાનાગો ગલદર્ચિર્ગલસન્મદઃ ॥ ૧૬૭॥

ગલત્કુષ્ઠિવ્યથાહન્તા ગલત્કુષ્ઠિસુખપ્રદઃ ।
ગમ્ભીરનાભિર્ગમ્ભીરસ્વરો ગમ્ભીરલોચનઃ ॥ ૧૬૮॥

ગમ્ભીરગુણસમ્પન્નો ગમ્ભીરગતિશોભનઃ ।
ગર્ભપ્રદો ગર્ભરૂપો ગર્ભાપદ્વિનિવારકઃ ॥ ૧૬૯॥

ગર્ભાગમનસન્નાશો ગર્ભદો ગર્ભશોકનુત્ ।
ગર્ભત્રાતા ગર્ભગોપ્ત ગર્ભપુષ્ટિકરઃ સદા ॥ ૧૭૦॥

ગર્ભાશ્રયો ગર્ભમયો ગર્ભામયનિવારકઃ ।
ગર્ભાધારો ગર્ભધરો ગર્ભસન્તોષસાધકઃ ॥ ૧૭૧॥

ગર્ભગૌરવસન્ધાનસન્ધાનં ગર્ભવર્ગહૃત્ ।
ગરીયાન્ ગર્વનુદ્ગર્વમર્દી ગરદમર્દકઃ ॥ ૧૭૨॥

ગરસન્તાપશમનો ગુરુરાજ્યસુખપ્રદઃ ।

॥ ફલશ્રુતિઃ ॥

નામ્નાં સહસ્રમુદિતં મહદ્ગણપતેરિદમ્ ॥ ૧૭૪॥

ગકારાદિ જગદ્વન્દ્યં ગોપનીયં પ્રયત્નતઃ ।
ય ઇદં પ્રયતઃ પ્રાતસ્ત્રિસન્ધ્યં વા પઠેન્નરઃ ॥ ૧૭૩॥

વાઞ્છિતં સમવાપ્નોતિ નાત્ર કાર્યા વિચારણા ।
પુત્રાર્થી લભતે પુત્રાન્ ધનાર્થી લભતે ધનમ્ ॥ ૧૭૪॥

વિદ્યાર્થી લભતે વિદ્યાં સત્યં સત્યં ન સંશયઃ ।
ભૂર્જત્વચિ સમાલિખ્ય કુઙ્કુમેન સમાહિતઃ ॥ ૧૭૫॥

ચતુર્થ્યાં ભૌમવારો ચ ચન્દ્રસૂર્યોપરાગકે ।
પૂજયિત્વા ગણધીશં યથોક્તવિધિના પુરા ॥ ૧૭૬॥

પૂજયેદ્ યો યથાશક્ત્યા જુહુયાચ્ચ શમીદલૈઃ ।
ગુરું સમ્પૂજ્ય વસ્ત્રાદ્યૈઃ કૃત્વા ચાપિ પ્રદક્ષિણમ્ ॥ ૧૭૭॥

ધારયેદ્ યઃ પ્રયત્નેન સ સાક્ષાદ્ગણનાયકઃ ।
સુરાશ્ચાસુરવર્યાશ્ચ પિશાચાઃ કિન્નરોરગાઃ ॥ ૧૭૮॥

પ્રણમન્તિ સદા તં વૈ દુષ્ટ્વાં વિસ્મિતમાનસાઃ ।
રાજા સપદિ વશ્યઃ સ્યાત્ કામિન્યસ્તદ્વશો સ્થિરાઃ ॥ ૧૭૯॥

તસ્ય વંશો સ્થિરા લક્ષ્મીઃ કદાપિ ન વિમુઞ્ચતિ ।
નિષ્કામો યઃ પઠેદેતદ્ ગણેશ્વરપરાયણઃ ॥ ૧૮૦॥

સ પ્રતિષ્ઠાં પરાં પ્રાપ્ય નિજલોકમવાપ્નુયાત્ ।
ઇદં તે કીર્તિતં નામ્નાં સહસ્રં દેવિ પાવનમ્ ॥ ૧૮૧॥

ન દેયં કૃપણયાથ શઠાય ગુરુવિદ્વિષે ।
દત્ત્વા ચ ભ્રંશમાપ્નોતિ દેવતાયાઃ પ્રકોપતઃ ॥ ૧૮૨॥

ઇતિ શ્રુત્વા મહાદેવી તદા વિસ્મિતમાનસા ।
પૂજયામાસ વિધિવદ્ગણેશ્વરપદદ્વયમ્ ॥ ૧૮૩॥

॥ ઇતિ શ્રીરુદ્રયામલે મહાગુમસારે શિવપાર્વતીસંવાદે
ગકારાદિ શ્રીગણપતિસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Karthik Raman karthik.raman at gmail.com

.. Gakaradi Shri Ganapati Sahasranama Stotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*